गुरुर्येषां तेऽन्योन्यं सतीर्थ्याः । समाने तीर्थे गुरौ वसन्ति सतीर्थ्याः । ढघेकादिति यः । ज्योतिर्जनपदेत्यादिना सः । तीर्थशास्त्रियुष्टजले गुरौ इति वच्यते । इति भरतः ॥ अपि च ।
"स्यात् सतीर्थः सतीर्थ्योऽपि तथैकगुरुरिष्यपि ।"
इति शब्दरत्नावली ॥

सतीलः, पुं, वंशः । इति हारावली ॥ वायुः । इत्यमरटीकायां रायमुकुटः ॥("तीलेन तीलवत् कृष्णवर्णचिह्नेन सह वर्त्तते इति । निपातनादिकारस्य दीर्घः,।"इति भरतः॥)कलायः । यथा,
"कलायस्त्रिपुटः प्रोक्तः सतीलो वर्त्तुलो मतः ।"
इति भरतधृतव्याडिः ॥

सतीलकः, पुं, ( सतील एव । स्वार्थे कन् । ) कलायः । यथा,—
"कलायस्तु सतीलकः हरेणुखण्डिकौ चास्मिन्"
इत्यमरः ॥
"चत्वारि कलाये । मटर इति ख्याते । कलायशब्दो विशेषे सामान्ये च अतएव माषकलाय इत्यादिप्रयोगः । कद्यते भुज्यते कलायः । कड भक्षणे नाम्नीति आयः मनीषादित्वात् डस्य लः । तिलेन तिलवत् कृष्णवर्णचिह्नेन सह वर्त्तते सतीलः निपातनादिकारस्य दीर्घः स्वार्थे के सतीलकः दन्त्यादिः । ह्रियते भक्षणार्थं हरति मनो वा हरेणुः नाम्नीति एणुः । खण्ड्यते विदार्य्यते खण्डिकः पूर्व्वेण इकः ।
"कलायस्त्रिपुटः प्रोक्तः सतीलो वर्त्तुलो मतः ।
हरेणुः कण्टका ज्ञेया——————
इति तु व्याडिः ।" इति भरतः ॥

सतीला, स्त्री, कलायविशेषः । तेओड़ा इति भाषा । यथा । सतीला निष्क्रिका तिष्टीति शब्दचन्द्रिका ॥

सतुषं, क्लौ, ( तुषेण सह वर्त्तमानम् ।) तुषयुक्तशस्यम् । धान्यम् । यथा,—
"शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते ।
आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम् ॥"
इति श्राद्धतत्त्वम् ॥

सतृट्, [ ष् ] त्रि, ( तृषा सह वर्त्तमानः । ) तृष्णायुक्तः । तत्पर्य्यायः । तृषितः२ तर्षितः३ । इति त्रिकाण्डशेषः ॥

सतेरः, पुं, तुषः । इति संक्षिप्तसारोणादिवृत्तिः ।

सत्, क्लौ, ( अस्तीति । अस + शतृ ) ब्रह्म । यथा । भगवद्गीतायाम् ।
"ओम् तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥"
ओम् तत् सदिति त्रिविधो ब्रह्मणो जगदीश्वरस्य निर्देशोऽभिधानं ब्रह्मविद्भिश्चिन्तितम् । तत्र तावदोमितिब्रह्मेत्यादि श्रुतिप्रसिद्धेरोमिति ब्रह्मणो नाम । पातञ्जलिरप्याह अस्यैव वाचकः प्रणवः । अस्य ब्रह्मणः । ओम्कारो भगवान् विष्णुरित्यादि तु वाच्यवाचकयोरभेदेन । तथा च । जगत्कारणत्वेन प्रसिद्धत्वादविदुषां परोक्षत्वाच्च तच्छब्दोऽपि ब्रह्मणो नाम । एवं परमार्थसत्त्वसाधुत्वप्रशस्तत्वादिभिः सच्छब्दोऽपि अतस्तेन त्रिविधनिर्देशेन, यद्वा यस्यायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयो निर्म्मिताः॥ वैदिके कर्म्मणि तेषां प्रथमतो निर्देशो यथा,—
"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥"
यस्मादेवं ब्रह्मणो निर्देशस्तस्मादोमित्युदाहृत्य उच्चार्य्य कृता वेदवादिनां यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततमङ्गवैकल्येऽपि प्रवर्त्तन्ते प्रकर्षेण वर्त्तन्ते सगुणा भवन्तीति भगवान् शङ्कराचार्य्यचरणाः ॥
"तदित्यनभिसन्धाय यज्ञदानतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥"
तदिति ब्रह्मणोऽभिधानमुदाहृत्य इत्यनुषङ्गः । अनभिसन्धाय कर्म्मणः फलमिति शेषः । तस्मात् फलाभिसन्धानं विना मुमुक्षुणा कर्म्म कर्त्तव्यमित्यपि बोध्यम् ।
"सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ युज्यते ॥"
यतो विद्यमानजन्मनि उत्कृष्टचरिते च सदित्येतत् प्रयुज्यते । अतो यज्ञादौ कर्म्मणि प्रथमतः सच्छब्दः प्रयुज्यते । इत्येकादशीतत्त्वम्॥*॥

सत्, त्रि, ( अस्तीति । अस + शतृ । ) सत्यम् । साधुः । (यथा, मुग्धबोधे ।
"रामंनमति सानन्दं वर्म्मानभिनिविश्य स सन् ।")
विद्यमानम् । ( यथा, हितोपदेशे ।
"दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥")
प्रशस्तम् । अभ्यर्हितम् । इत्यमरः ॥ धीरः । इति मेदिनी ॥

सत्कदम्बः, पुं, ( सन् कदम्बः । ) केलिकदम्बः । यथा,—
"केलिवृक्षः सत्कदम्बो व्रजभूः शिशुपालकः ।"
इति शब्दचन्द्रिका ॥

सत्कर्त्ता, [ ऋ ] पुं, ( सतां कर्त्ता । ) विष्णुः । यथा । सत्कर्त्ता सत्कृतः साधुरिति तस्य सहस्रनामस्तोत्रम् ॥

सत्कर्म्म, [ न् ] क्लौ, (सत् प्रशस्तं कर्म्म । वेदविहितक्रिया । यथा । विष्णुपुराणे ।
"सत्कर्म्मयोग्यो न जनो नैवापः शौचकारणम्
यस्मिन्ननुदिते तस्मै नमो देवाय भास्वते ॥"
इति प्रायश्चित्ततत्त्वम् ॥

सत्काञ्चनारः, पुं, ( सन् काञ्चनारः । ) रक्तकाञ्चनः । यथा,—
"कोविदारे चमरिकः कुद्दालो युगपत्रकः ।
सत्काञ्चनारः कामालुर्हयवाहनशङ्करः ॥"
इति शब्दचन्द्रिका ॥

सत्काण्डः, पुं, चिल्लः । इति शब्दचन्द्रिका ॥

सत्कारः,पुं,(सत्करणमिति । सत् + कृ + घञ् । पूजा । यथा । एवम्भूताः सभासदः सभायां यथा सीदन्ति उपविशन्ति तथा दानमानसत्कारै राज्ञा कर्त्तव्याः । इति व्यवहारतत्त्वम् ॥ (यथा, कुमारे । ६ । ५२ ।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्म्मभिः ॥"
उत्सवविशेषः । यथा, मनुः । २ । ५८ ।
"तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥".
"सत्कारेषु कौमुद्यादिषु उत्सवेषु उपनयनादिषु ।" इति तट्टीकायां कुल्लूकः ॥*॥)
शवदाहादिक्रिया । इति लोकप्रसिद्धिः ॥

सत्कुलीनः,पुं,(सत्कुले जातः । सत्कुल + खः । सन् प्रशस्तः कुलीन इति वा ।) सत्कुलोद्भवः । यथा,—
"सत्कुलीनाय शान्ताय ऋजवे दम्भवर्ज्जिते ।
दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकामफलप्रदम् ॥"
इति विश्वसारतन्त्रे वटुकभैरवस्तोत्रम् ॥

सत्कृतः, त्रि, (सत् + कृ + क्तः ।) पूजितः । कृतसत्कारः । यथा,—
"तस्मै कश्चित् स कालञ्च मुनिना तेन सत्कृतः ।"
इति देवीमाहात्म्यम् ॥
(महादेवे, पुं । इति महाभारतम् । १३ । १७ । ११३ ॥)

सत्कृतिः, स्त्री, (सत् + कृ + क्तिन् ।) सत्कारः । सत्क्रियाशब्दार्थदर्शनात् ॥ (यथा, भागवते । २० । १५ । ४३ ।
"तत्सत्कृतिं समधिगम्य विवेश गोष्ठं
सव्रीड़हासविनयं यदपाङ्गमोक्षम् ॥"
पुं, विष्णुः । इति महाभारतम् ।१३।१४९।८८॥)

सत्क्रिया, स्त्री, (सती क्रिया ।) शवदाहादिक्रिया । तत्पर्य्यायः । संस्क्रिया२ । इति त्रिकाण्डशेषः ॥ संस्कारः ३ । इति शब्दरत्नावली ॥ यथा, महाभारते । १ । ४४ । ५ ।
"ततो नृपे तक्षकतेजसा हृते
प्रयुज्य सर्व्वाः परलोकसत्क्रियाः ।
शुचिर्द्विजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः ॥"
परिष्कारः । यथा, रघुः । ११ । ३ ।
"यावदादिशति पार्थिवस्तयो-
र्निर्गमाय पुरमार्गसत्क्रियाम् ।
तावदाशु विदधे मरुत्सखैः
सा सपुष्पजलवर्षिभिर्घनैः ॥")
सम्मानम् । यथा, मनुः ।
"घटेऽपवर्ज्जिते ज्ञातिमध्यस्थो यवसं गवाम् ।
प्रदद्यात् प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया॥"
इति प्रायश्चित्ततत्त्वम् ॥

सत्तमः, त्रि, (अयमेषामतिशयेन सन् । सत् + तमप् ।) अतिशोभनः । इत्यमरः ॥ पूज्यतमः । साधीयान् । उत्तमः । इति मेदिनी ॥ (यथा, देवीभागवते । ११ । १६ । ३ ।
"तद्ब्देदानपि वच्यामि शृणु देवर्षिसत्तम ! ॥")

सत्ता, स्त्री, जातिविशेषः । इति भाषापरिच्छेदः॥ (सतो भावः । सत् + तल् ।) विद्यमानता ।